विलेखनं, क्ली, लेखनम् । विपूर्ब्बकलिखधातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम् ॥

विलेपः, पुं, लेपः । विपूर्ब्बकलिपधातोर्घञ्प्रत्ययेन निष्पन्नः ॥ ( यथा, भागवते । १० । ४२ । १ ।

"अथ व्रजन् राजपथेन माधवः
स्त्रियं गृहीताङ्गविलेपभाजनाम् ।
विलोक्य कुब्जां युवतीं वराननां
पप्रच्छ यान्तीं प्रहसन् रसप्रदः ॥")

विलेपनं, क्ली,(विलिप्यन्तेऽङ्गान्यनेनेति । वि + लिप + ल्युट् । ) गात्रानुलेपनयोग्यं पिष्टं घृष्टं वा सुगन्धिद्रव्यम् । तत्पर्य्यायः । गात्रानुलेपनी २ वर्त्तिः ३ वर्णकम् ४ । इत्यमरः ॥ "द्वे गात्रानुलेपनयोग्ये वर्त्तितविलेपने ।
'वर्ण्णकादिद्वयं पट्टचन्दनादिविलेपने ॥'
इति केचित् । विलिप्यतेऽनेन करणेऽनटि विलेपनम् ।" इति तट्टीकायां भरतः ॥ कुङ्कुमादिविलेपनम् । तत्पर्य्यायः । समालम्भः २ । इति च संकीर्णवर्गे अमरः ॥

विलेपनी, स्त्री, ( वि + लिप् + कर्म्मणि करणे वा ल्युट् । ङीप् ।) यवागूः । सुवेशस्त्री । इति मेदिनी ॥

विलेपी, स्त्री, ( विलिप्यतेऽसाविति । वि + लिप + कर्म्मणि घञ् । स्त्रियां ङीष् ।) यवागूः । इत्यमरः ॥

"अन्नं पञ्चगुणे साध्यं विलेपी च चतुर्गुणे ।
मण्डश्चतुर्द्दशगुणे यवागूः षड्गुणेऽम्भसि ॥"

इति वैद्यकोक्तो भेद इह नादृतः । इति तट्टीकायां भरतः ॥ अस्या गुणाः ।

"विलेपी तर्पणी हृद्या ग्राहिणी तुष्टिदा-
पथ्या ॥"

इति राजवल्लभः ॥

विलेपी, [ न् ] त्रि, लेपनकर्त्ता । विलेपयति यः इत्यर्थे णिनिप्रत्ययेन निष्पन्नः ॥ ( यथा, कथासरित्सागरे । ३७ । २५ ।

"ततः प्रागनुरागेण रञ्जितः स्वाम्बरान् मम ।
पश्चात् एतद्विलेपिन्या अङ्गरागेण ते करः ॥")

विलेप्यः, पुं, ( वि + लिप् + यत् । ) यवागूः । इति शब्दरत्नावली ॥ विलेपनीये, त्रि ॥ ( यथा, भागवते । ११ । २७ । १४ ।

"स्नपनं त्वविलेप्यायामन्यत्र परिमार्ज्जनम् ॥")

वि(बि)लेवासी, [ न् ] पुं, ( बिले गर्त्ते वसतीति । वस + णिनिः । "शयवासेति ।" ६ । ३ । १८ । सप्तम्या अलुक् । ) सर्पः । इति शब्दरत्नावली ॥

वि(बि)लेशयः, पुं, (बिले शेते इति । बिले + शी + "अधिकरणे शेतेः ।" ३ । २ । १५ । इत्यच् । शयवासेत्यलुक् ।) सर्पः । इत्यमरः ॥ मूषिकः । इति जटाधरः । गोधा । शशः । शल्लकी । यथा,—

"गोधाशशकसर्पाखुशल्लक्याद्या बिलेशयाः ।
बिलेशया वातहरा मधुरा रसपाकयोः ।
बृंहणा बद्धविण्मूत्रा वीर्य्योष्णा अपि कीर्त्तिताः ॥"

इति भावप्रकाशः ॥

(गर्त्तशायिनि, त्रि । यथा, महाभारते । १ । ४५ । ३ ।

"स ददर्श पितॄन् गर्त्ते लम्बमानानधोमुखान् ।
एकतन्त्ववशिष्टं वै वीरणस्तम्बमाश्रितान् ।
तं तन्तुञ्च शनैराखुमाददानं बिलेशयम् ॥" )

विलोकनं, क्ली, आलोकनम् । विपूर्ब्बलोकधातोरनट्-(ल्युट्)-प्रत्ययेन निष्पन्नम् । ( यथा, किराते । ३ । ३६ ।

"अनुचरेण धनाधिपतेरथो
नगविलोकनविस्मितमानसः ॥" )

विलोकितं, त्रि, आलोकितम् । विपूर्ब्बलोकधातोः क्तप्रत्ययेन निष्पन्नम् ॥

विलोचनं, क्ली, ( विलोच्यते दृश्यतेऽनेनेति । वि + लोचि + ल्युट् । ) चक्षुः । इति जटाधरः ॥ ( यथा, कुमारे । ३ । ६७ ।

"उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि ॥")

दर्शनञ्च ॥ (विरुद्धे लोचने यस्येति । विकृतनयने, त्रि । यथा, देवीभागवते । ५ । ३१ । ४३ ।

"यदि ते सङ्गरेच्छास्ति कुरूपा भव भामिनि ।
लम्बोष्ठी कुनखी क्रूरा ध्वाङ्क्षवर्णा विलोचना ॥")

विलोटकः, पुं, ( विशेषेण लुटतीति । वि + लुट् + ण्वुल् । ) नलमीनः । इति शब्दचन्द्रिका ॥ वेलेमाछ इति भाषा ॥

विलोड़नं, क्ली, ( वि + लुड् + ल्युट् । ) मन्थनम् । आलोड़नम् । यथा,—

"राधिका दधिविलोड़नस्थिता
कृष्णवेणुनिनदैरथोद्धता ।
यामुनं तटनिकुञ्जमञ्जसा
सा जगाम सलिलाहृतिच्छलात् ॥"

इति छन्दोमञ्जरी ॥

विलोड़ितं, क्ली, ( वि + लुड् + क्तः । ) तक्रम् । इति राजनिर्घण्टः ॥ आलोड़िते, त्रि ॥

विलोपः, पुं, विशेषेण लोपः । विपूर्ब्बलुपधातोर्घञ्प्रत्ययेन निष्पन्नः ॥ ( यथा, कामन्दकीयनीतिसारे । ५ । ६५ ।

"काले स्थाने च पात्रे च न हि वृत्तिं विलोपयेत् ।
एतद्वृत्तिविलोपेन राजा भवति गर्हितः ॥")

विलोभः, पुं, विलोभनम् । विशेषलोभः । विपूर्ब्बकलुभधातोर्घञ् प्रत्ययेन निष्पन्नः ॥

विलोमं, क्ली, अरघट्टकः । इति मेदिनी ॥

विलोमं, त्रि, विपरीतम् । तत्पर्य्यायः । प्रतिकूलम् २ अपसव्यम् ३ अपष्ठुरम् ४ वामम् ५ प्रसव्यम् ६ प्रतीपम् ७ प्रतिलोमम् ८ अपष्ठु ९ । इति हेमचन्द्रः ॥ सव्यम् १० विलोमकम् ११ । इति जटाधरः ॥ ( यथा, बृहत्संहितायाम् । ९४ । १२ ।

"द्रुतमुकुलितदृष्टिः स्वप्नशीलो विलोमो
भयकृतहितभक्षो नैकशोऽव्यक्तकश्च ॥")

विलोमः, पुं, सर्पः । वरुणः । कुक्कुरः । इति मेदिनी ॥

विलोमकः, त्रि, ( विलोम एव । स्वार्थे कन् । ) विपरीतः । इति जटाधरः ॥

विलोमजिह्वः, पुं, (विलोमा जिह्वा यस्य ।) हस्ती । इति त्रिकाण्डशेषः ॥

विलोमवर्णः, पुं, ( विलोमः प्रतिलोमो वर्णः । ) वर्णसङ्करजातिः । इति स्मृतिः ॥

विलोमी, स्त्री, आमलकी । इति मेदिनी ॥

विलोलः, त्रि, ( विशेषेण लोलः । ) चपलः । यथा,—

"क्वापि विलासविलोलविलोचनखेलनजनितमनोजम् ।
ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम् ॥"

इति श्रीगीतगोविन्दे । १ । ४२ ॥

वि(बि)ल्लं, क्ली, आलवालम् । यथा,—

"अवघट्टावटौ तुल्यौ तल्लं विल्लं तलञ्च तत् ।
हिमप्रपालवालं स्यात् केदारः पांशुमर्द्दनः ॥"

इति त्रिकाण्डशेषः ॥

हिङ्गुः । इति शब्दचन्द्रिका ॥

वि(बि)ल्लमूला, स्त्री, वाराहीकन्दः । इति शब्दचन्द्रिका ॥

वि(बि)ल्लसूः, स्त्री, प्रसूतदशपुत्त्रा । यथा,—

"सप्तपुत्त्रप्रसूतायां सप्तसूः सुतवस्करा ।
विल्लसूर्द्दशपुत्त्रा स्यादेकाधिका तु रुद्रसूः ॥"

इति शब्दरत्नावली ॥

वि(बि)ल्वं, क्ली, बिल्वस्य फलम् । इति, मेदिनी ॥ ( यथा,—

"खलः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ॥"

इत्युद्भटः ॥ )

फलपरिमाणम् । इति शब्दमाला ॥ ( यथा, सुश्रुते । ६ । १८ ।

"अत ऊर्द्धं प्रवक्ष्यामि पुटपाकप्रसाधनम् ।
द्वौ बिल्वमात्रौ श्लक्ष्णस्य पिण्डौ मांसस्य पेषितौ ।
द्रव्याणां बिल्वमात्रन्तु द्रवाणां कुड़वो मतः ॥")

वि(ब)ल्वः, पुं, (बिल भेदने + उल्वादयश्चेति साधुः ।) फलवृक्षविशेषः । वेलगाछ इति भाषा ॥ तत्पर्य्यायः । शाण्डिल्यः २ शैलूषः ३ मालूरः ४ श्रीफलः ५ । इत्यमरः ॥ महाकपित्थः ६ गोहरीतकी ७ पूतिवातः ८ अतिमङ्गल्यः ९ महाफलः १० । इति रत्नमाला ॥ शल्यः ११ हृद्यगन्धः १२ शलाटुः १३ कण्टकाढ्यः १४ शैलपत्रः १५ शिवेष्टः १६ पत्रश्रेष्ठः १७ त्रिपत्रः १८ गन्धपत्रः १९ लक्ष्मीफलः २० गन्धफलः २१ दुरारुहः २२ त्रिशाखपत्रः २३ त्रिशिखः २४ शिवद्रुमः २५ सदाफलः २६ सत्यफलः २७ सुभूतिकः २८ समीरसारः २९ । अस्य फलगुणाः । मधुरत्वम् । तुवरत्वम् । कषायत्वम् । गुरुत्वम् । पित्तकफज्वरातिसारनाशित्वम् । रुचिकारित्वम् । दीपनत्वञ्च । अस्य मूलगुणाः । त्रिदोषघ्नत्वम् । मधुरत्वम् । लघुत्वम् । वान्तिनाशित्वञ्च ॥ अस्य कोमलफलगुणाः । स्निग्धत्वम् । गुरुत्वम् । संग्राहित्वम् ।